श्री राम आपदुद्धारण स्तोत्रं

श्री राम आपदुद्धारण स्तोत्रं

आपदामपहर्तारं दातारं सर्वसंपदां |
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहं || 1 ||

आर्तानामार्तिहंतारं भीतानां भीतिनाशनं |
द्विषतां कालदंडं तं रामचंद्रं नमाम्यहं || 2 ||

नमः कोदंडहस्ताय संधीकृतशराय च |
खंडिताखिलदैत्याय रामायापन्निवारिणे || 3 ||

रामाय रामभद्राय रामचंद्राय वेधसे |
रघुनाथाय नाथाय सीतायाः पतये नमः || 4 ||

अग्रतः पृष्ठतश्चैव पार्श्वतश्च महाबलौ |
आकर्णपूर्णधन्वानौ रक्षेतां रामलक्ष्मणौ || 5 ||

सन्नद्धः कवची खड्गी चापबाणधरो युवा |
गच्छन् ममाग्रतो नित्यं रामः पातु सलक्ष्मणः || 6 ||

अच्युतानंतगोविंद नमोच्चारणभेषजात् |
नश्यंति सकला रोगाः सत्यं सत्यं वदाम्यहं || 7 ||

सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते |
वेदाच्छास्त्रं परं नास्ति न देवं केशवात्परं || 8 ||

शरीरे जर्झरीभूते व्याधिग्रस्ते कलेवरे |
औषधं जाह्नवीतोयं वैद्यो नारायणो हरिः || 9 ||

आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः |
इदमेकं सुनिष्पन्नं ध्येयो नारायणो हरिः || 10 ||